तादृशः कुण्डो यत्र । नरकभेदे नरकशब्दे दृश्यम् ।

**तप्तशूर्मी** पु० नरकभेदे तत्प्राप्तिहेतुरुक्तः भाग०५।२६। यथा "यस्त्विह वा अगम्यां स्त्रियं पुरुषोऽगम्यं वा पुरुषं योषिदभिगच्छति । तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या लोहमय्या पुरुषमालिङ्गयन्ति । स्त्रियं च पुरुषरूपया सूर्म्या" २६ तिग्मया तप्तया सूर्म्या प्रतिमया" श्रीधरः

**तप्तसुराकुण्ड** पु० नरकभेदे ७त० । नरकशब्दे दृश्यम् ।

**तप्तायनी** स्त्री तप्तेन अय्यतेऽत्र अय–आधारे ल्युट् ङीप् । भूमिभेदे "तप्तायनी मेऽसि" यजु०५।८। तप्तं पुरुषमयति प्राप्नोतीति तप्तायनी । यो हि दरिद्रः क्षेत्ररहितोऽहमिति सन्तप्यते तं तापोपशान्त्यर्थं प्राप्नोषि इत्यर्थः। यद्वा तप्तः सन्नरो यस्मामयति सा तप्तायनी समासि" वेददी०

**तप्यतु** त्रि० तप–यतुन् । तापके सूर्यादौ । "सूर्यस्तपति तप्यतुर्वृथा" ऋ० २।२४।८ ।

**तम** खेदे अक० इच्छायां सक० दिवा० शमा० पर० सेट् । ताम्यति । इरित् अतमत्–अतमीत् । तताम तेमतुः उदित् । तमित्वा तान्त्वा तान्तः । "यस्ताम्यति विसंज्ञश्च शेते" सुश्रु० । "ताम्येयुः प्रच्युताः पृथ्व्या यथा पूर्णा नदीं नराः । अवगाढा ह्यविद्वांसः" भा० शा० ६०३० श्लो० । "यदा वै तान्तः प्राणं लभतेऽथ संजिहीते" शत० ब्रा० ४।२।२।११ । "न वा तमन्त श्रमोन्नत तन्द्रत्" ऋ० २।३०।७ लुङि रूपम् ।

उद्+उत्कर्षेण खेदे । "तस्योत्ताम्यतो वाष्पमुज्जहार बलादहम्" रामा० अयो० ६५ अ० ।

नि+अतिशयार्थे अक० । नितान्तम् । "नितान्तदीर्घैर्जनिता तपोभिः" "गोरोचनाक्षेपनितान्तगौरै" कुमा० ।

परि+भृश खेदे । "संतप्तवक्षाः सोऽत्यर्थं दूयनात् परिताम्यति" सुश्रु० ।

**तम** न० ताम्यत्यनेन तम–करणे घञर्थे संज्ञायां क ।१अन्धकारे शब्दर० । २पादाग्रे शब्दच० । ३तमोगुणे राजनि० ४राहौ पु० ज्यो० ५तमालवृक्षे पु० शब्दच० ।

**तमक** पु० ताम्यत्यत्र तम वा–वुन् । श्वासरोगभेदे "हृत्खेदवमथुप्रायः कण्ठघुर्घुरिकान्वितः । विशेषाद्दुर्दिने ताम्येत् श्वासः स्यात्तमकोमतः" सुश्रुतः । "क्षुद्रः साध्यतमस्तेषां तमकः कृच्छ्र उच्यते । त्रयः श्वासा न सिध्यन्ति तमको दुर्बलस्य च" सुश्रुतः ।

**तमत** त्रि० तम–काङ्क्षायाम् अतच् । तृष्णापरे उज्ज्वल० ।

**तमस्** न०तम–करणादौ–असुन् । त्रिगुणात्मकप्रधानस्य गुणभेदे "सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैः" भाग० १।४। भा० आश्वमेधिकपर्वणि तस्य कार्यभेदादिकमुक्तं यथा "ब्रह्मोवाच । तदव्यक्तमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम् । नवद्वारं पुरं विद्यात् त्रिगुणं पञ्चधातुकम् । एकादशपरिक्षेपं मनोव्याकरणात्मकम् । बुद्धिस्वामिकमित्येतत्पुरमेकादशं भवेत् । त्रीणि स्रोतांसि यान्यस्मिन्नाप्यायन्ते पुनः पुनः । प्राणेभ्यस्त्रिषु एवैताः प्रवर्त्तन्ते गुणात्मिकाः । तमो रजस्तथा सत्त्वं गुणानेतान् प्रचक्षते । अन्योन्यमिथुनाः सर्वे तथाऽन्योन्यानुजीविनः । अन्योन्यापाश्रयाश्चापि तथाऽन्योन्यानुवर्त्तिनः । अन्योन्यव्यतिषक्ताश्च त्रिगुणाः पञ्च धातवः । तमसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः । रजसश्चापि सत्त्वं स्यात् सत्त्वस्य मिथुनं तमः । नियम्यते तमो यत्र रजस्तत्र प्रवर्त्तते । नियम्यते रजो यत्र सत्त्वं तत्र प्रवर्तते । नैशात्मकं तमो विद्यात् त्रिगुणं मोहसंज्ञितम् । अधर्मलक्षणञ्चैव नियतं पापकर्मसु । प्रवृत्त्यात्मकमेवाहुः रजः पर्य्यायकारकम् । प्रवृत्तं सर्वभूतेषु दृश्यमुत्पत्तिलक्षणम् । प्रकाशः सर्वभूतेषु लाघवं श्रद्दधानता । सात्त्विकं रूपमेवन्तु लाघवं साधुसम्मितम् । एतेषां गुणतत्त्वानि वक्ष्यन्ते तत्त्वहेतुभिः । समासव्यासयुक्तानि तत्त्वतस्तान्निबोधत । संमोहोऽज्ञानमत्यागः कर्मणामविनिर्णयः । स्वप्नः स्तम्भो भयं लोभः शोकः सुकृतदूषणम् । अस्मृतिश्चाविपाकश्च नास्तिक्यं भिन्नवृत्तिता । निर्विशेषत्वमन्धत्वं जघन्यगुणवृत्तिता । अकृते कृतमानित्वमज्ञाने ज्ञानमानिता । अमैत्री विकृतीभावोह्यश्रद्धा मूढभावना । अनार्जवमसंज्ञत्वं कर्म पापमचेतना । गुरुत्वं सन्नभावत्वमवशित्वमवाग्गतिः । सर्व एते गुणावृत्तास्तामसाः संप्रकीर्तिताः । ये चान्ये विहिताभावा लोकेऽस्मिन् भावसंज्ञिताः । तत्र तत्र नियम्यन्ते सर्वे ते तामसा गुणाः । परिवादकथा नित्यं नित्यं ब्राह्मणनिन्दकाः । अत्यागश्चाभिमानश्च मोहो मन्युस्तथाऽक्षमा । मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते । वृथारम्भा हि ये केचिद्वृथादानानि यानि च । वृथा भक्षणमित्येतत् तामसं वृत्तमिष्यते । अतिवादोऽतितिक्षा च मात्सर्य्यमतिमानिता । अश्रद्दधानताचैव तामसं वृत्तमिष्यते । एवंविधाश्च ये केचिल्लोकेऽस्मिन् पापकर्मिणः । मनुष्या भिन्नमर्य्यादास्ते सर्वे